Shloka (in devanagari)

यदि मामप्रतिकारमशस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥

(in English)

yadi māmapratikāramaśastraṁ śastrapāṇayaḥ |
dhārtarāṣṭrā raṇē hanyustanmē kṣēmataraṁ bhavēt ||

Index Ref 1st chapter,46 of 47

पदच्छेदः यदि, माम्, अप्रतीकारम्, अशस्त्रम्, शस्त्रपाणयः ।
धार्तराष्ट्राः, रणे, हन्युः, तत्, मे, क्षेमतरम्, भवेत् ॥

अन्वयार्थः (Prose Order with meaning & introduction to the word)

यदि	पक्षान्तरे,अपरस्मिन् पक्ष्ये	If	अव्ययम्
शस्त्रपाणयः	आयुधधारिणः,प्रहरणसहिताः	weapons in	इ.पुं.प्र.बहु.
धार्तराष्ट्राः	धृतराष्ट्रपुत्राः,दुर्योधनादयः	sons of Dhrtarastra	अ.पुं.प्र.बहु.
अशस्त्रम्	आयुधरहितम्,विनाशस्त्रम्	unarmed	अ.पुं.द्वि.एक.
अप्रतीकारम्	प्रतिक्रियाशून्यम्,निश्चेष्टनम्	unresisting	अ.पुं.द्वि.एक.
माम्	माम्	me	अस्मद् - द.सर्व.द्वि.एक.
रणे	युद्धे	in the battle	अ.पुं.स.एक.
हन्युः	,मारयितुम्	should slay	हन् - पर.कर्तरि.वि.लिङ् प्रपु.बहु.
तत्	तत्	that	तद् - द.सर्व.नपुं.प्र.एक.
मे	मम	my	अस्मद् - द.सर्व.ष.एक.
क्षेमतरम्	शुभकरम्,मङ्गलकरम्	better	अ.नपुं.प्र.एक.
भवेत्	स्यात्	would be	भू - पर.कर्तरि.वि.लिङ् प्रपु.एक.

अर्थः Meaning यदि धार्तराष्ट्राः शस्त्रपाणयः अशस्त्रम् अप्रतीकारं मां रणे हन्युः तत् मे क्षमेतरं भवेत् ।
Verily, if the sons of Dhrtarastra, weapons in hand, were to slay me, unresisting and unarmed, in the battle, that would be better for me.

तात्पर्यं किञ्चिदपि प्रतीकारम् अकुर्वन्तम् अगृहीतशस्त्रं च मां गृहीतशस्त्राः एते कौरवाः यदि युद्धे मारयन्ति तर्हि तदेव मम क्षेमतरं भवति इति भावयामि ।

व्याकरणम्

सन्धिः	अशस्त्रं शस्त्रपाणयः	- अशस्त्रम्	+ शस्त्रपाणयः	अनुस्वारसन्धिः
	धार्तराष्ट्रा रणे	- धार्तराष्ट्राः	+ रणे	विसर्गसन्धिः (लोपः)
	हन्युस्तन्मे	- हन्युः	+ तत्	विसर्गसन्धिः (सकारः)
	यद्राज्यसुखलोभेन	- तत्	+ मे	अनुनासिकसन्धिः
	क्षेमतरं भवेत्	- क्षेमतरम्	+ भवेत्	अनुस्वारसन्धिः

समासः
अप्रतीकारम् - न विद्यते प्रतीकारः यस्य सः अप्रतीकारः, तम् - नञ् बहुव्रीहिः ।
अशस्त्रम् - न विद्यते शस्त्रं यस्य सः अशस्त्रः, तम्- नञ् बहुव्रीहिः ।
शस्त्रपाणयः - शस्त्रं पाणौ येषां ते - व्यधिकरणबहुव्रीहिः ।

कृदन्तः
प्रतिकारम् - प्रति + कृ + घञ् (भावे), तम् । प्रतिकारः / प्रतिकारः ।
धार्तराष्ट्राः - दृश्यताम् - १.१९

क्षेमतरम् - क्षेम + तरप् (अतिशयार्थे) । अतिशयेन क्षेमम् ।